## एतदस्त्रतसोस्त्रतसौ चानुदात्तौ। (३३/१९६२)

अन्वादेशे[1]ऽनुदात्त इति वर्तते। एतदोऽन्वादेशविषयस्य अशादेशो भवति अनुदात्तः त्रतसोः परतः। तौ चापि त्रतसावनुदात्तौ भवतः। एतस्मिन् ग्रामे सुखं वसामः, अथो अत्र युक्ता अधीमहे। एतस्माच्छात्राच्छन्दोऽधीष्व, अथो अतो व्याकरणमप्यधीष्व। [2]सर्वानुदात्तं पदं भवति। एतदोऽश् इत्यादेशे लब्धे पुनर्वचनमनुदात्तार्थम्॥

## द्वितीयाटौस्स्वेनः। (३४/३५१)

[3]अन्वादेशेऽनुदात्तः इति वर्तते। द्वितीया टा ओस् इत्येतेषु परत इदमेतदोरन्वादेशविषययोः [4]एनशब्द आदेशो भवति अनुदात्तः[5]। इदमो मण्डूकप्लुतिन्यायेनानुवृत्तिः। इमं छात्रं छन्दोऽध्यापय, अथो एनं व्याकरणमध्यापय। [6]अनेन छात्रेण रात्रिरधीता, अथो एनेनाहरप्यधीतम्। अनयोश्छात्रयोः शोभनं शीलम्, अथो एनयोः प्रभूतं स्वम्। एतदः खल्वपि — एतं छात्रं छन्दोऽध्यापय, अथो एनं [7]व्याकरणमप्यध्यापय। एतेन छात्रेण रात्रिरधीता, अथो एनेनाहरप्यधीतम्। एतयोश्छात्रयोः शोभनं शीलम्, अथो एनयोः प्रभूतं स्वम्।

[१६५] एनदिति [8]नपुंसकैकवचने वक्तव्यम्। (म.भा. १.४८२)

प्रक्षालयै[9]नत्। [10]परिवर्तयैनत्।

इह कस्मान्न भवति, अयं दण्डो हरानेन, एतमातं ङितं विद्यात् (म.भा. १.२७५) इति ? यत्र किञ्चिद् विधाय वाक्यान्तरेण पुनरन्यदुपदिश्यते सो[11]ऽन्वादेशः। इह तु वस्तुनिर्देशमात्रं कृत्वा एकमेव विधानम्[12]॥

## आर्धधातुके। (३५/२४३२)

आर्धधातुके [13]इत्यधिकारोऽयम्, 'ण्यक्षत्रियार्षञितो यूनि लुगणिञोः' (२.४.५८/१२७६) इति [14]यावत्। यदित ऊर्ध्वमनुक्रमिष्यामस्तदार्धधातुके[15] वेदितव्यम्। वक्ष्यति 'हनो वध लिङि' (२.४.४२/२४३३) — वध्यात्। आर्धधातुके इति [16]किम्? हन्यात्। विषयसप्तमी चेयं, न परसप्तमी। तेनार्धधातुकविवक्षायामादेशेषु कृतेषु पश्चाद् [17]यथाप्राप्तं प्रत्यया भवन्ति। भव्यम्। प्रवेयम्। आख्येयम्[18]॥

## अदो जग्धिर्ल्यप्ति किति। (३६/३०८०)

अदो जग्धिः आदेशो भवति ल्यपि [19]परतः, तकारादौ [20]च किति प्रत्यये। प्रजग्ध्य। विजग्ध्य। [21]जग्धः। जग्धवान्। इकार उच्चारणार्थः, नानुबन्धः। तेन नुम् न भवति। एवं [22]वच्यादीनामपि। इह कस्मान्न भवति, अन्नम्? 'अन्नाण्णः' (४.४.८५/१६३७) इति निपातनात्।

---

1. अश् इत्यधिकम् ड. 2. सर्वमनुदात्तं ग, सर्वानुदात्तपदं ब.क.इ. 3. अन्वादेशविषये इ. 4. एनादेशः फ. 5. च इत्यधिकम् ह. 6. एतेन ग. 7. अपि नास्ति फ. 8. नपुंसकलिङ्गैकवचने फ. 9. एतत् ह.ड.फ. 10. अथो परिवर्तय एनम् ड.ह. 11. अन्वादेशविषयः इ. 12. इति इत्यधिकम् इ. 13. इत्ययमधिकारः क. 14. यावत् नास्ति इ. 15. इति इत्यधिकम् ग. 16. किमर्थं इ. 17. यथायथं इ. 18. यद् भवति इत्यधिकम् इ. 19. परतः नास्ति ड. 20. च नास्ति ड. 21. जग्धिः क.ड.ह. 22. वध्यादीनाम् ब, पच्यादीनाम् ह.